International Journal of Sanskrit Research 2017; 3(1): 16-18

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 16-18
© 2017 IJSR
www.anantaajournal.com
Received: 06-11-2016
Accepted: 07-12-2016

इन्दु आर्या शोधछात्रा
विद्यावारिधि श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ नवदेहली

Correspondence
इन्दु आर्या शोधछात्रा
विद्यावारिधि श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ नवदेहली

# मनुष्यजीवनस्योद्देश्यम्

## इन्दु आर्या शोधछात्रा

प्राणिमात्रेषु मनुष्यजीवनं सर्वश्रेष्ठं विद्यते। यतो हि मनुष्ये विवेकः, कर्तव्याकर्तव्यताज्ञानम्, भावना, संस्कारः इत्यादयो गुणा विराजन्ते। मनुष्य एव शास्त्रविहितानुष्ठानादिकं विधाय परमपुरुषार्थभूतम् अपवर्गं मोक्षापरपर्यायम् अधिगन्तुं शक्नोति। एतादृशं बहुमूल्यं जीवनम् अधिगम्याऽपि यदि मनुष्यः स्वजीवनस्योद्देश्यविषये अनभिज्ञः उदासीनो वा यदि वर्तते तर्हि तस्य तदधिकं दुर्भाग्यं किं वा अन्यद् भवेत्? मनुष्यशरीरम् अतीव दुर्लभं विद्यते, उक्तं हि श्रीमच्छङ्कराचार्यभगवद्भिः विवेकचूडामणौ जन्तूनां नरजन्म दुर्लभमित्यादि। अन्यप्राणिनां शरीरं केवलं भोगार्थमेव विद्यते, न केवलं पश्वादिशरीरम् अपितु स्वर्गीयदेवादिशरीरमपि भोगार्थमेव विद्यते। मनुष्यशरीरं तु भोगसम्पादकं सत् धर्मस्य मोक्षस्य च सम्पादकं विद्यते। अतो हेतोः मनुष्यशरीरेभ्यो देवा अपि स्पृहयन्ति। मनुष्यशरीरेण क्रियमाणानि कर्माणि एव देहान्तरेण भोग्यस्य भोगस्य कारणानि भवन्ति। अत एव उक्तं नीतिशास्त्रेषु–

पूर्वजन्मकृतं कर्म तद्दैवमिति उच्यते। इति।

ये मनुष्याः स्वजीवनस्य वैशिष्ट्यं विस्मृत्य स्वजीवनं निष्फलं कुर्वन्ति तेषां शास्त्रेषु बहुधा निन्दाऽपि श्रूयते। यथा–

ते मर्त्यलोके भुमिभारभूता मनुष्यरूपेण मृगाश्चरन्ति।
किञ्च–धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।
अजागलस्तनस्येव तस्य जन्म निरर्थकम्। इत्यादि।

तर्हि अतिविशिष्टस्य मनुष्यजीवनस्य परमोद्देश्यं किमिति चेत्, पुरुषार्थ एवेति मन्तव्यम्। यज्ज्ञातं सत् स्ववृत्तितयेष्यते स पुरुषार्थ इति पुरुषार्थलक्षणम्। अर्थात् यद् वस्तु ज्ञातं सत् 'मम सम्बन्धि भवतु' इतीष्यते तदेव पुरुषार्थः। इतरेच्छानधीनेच्छाविषयत्वमित्यत्र तात्पर्यम्। पुराणेतिहासेषु पुरुषार्थचतुष्टयं वर्णितं वर्तते। ते च धर्म–अर्थ–काम–मोक्षाः। यथा चोक्तं महाभारते–

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तद्कचित्।। इति।

किन्तु दर्शनशास्त्रेषु पुरुषार्थचतुष्टयस्य चर्चा न श्रूयते। तत्र तु एक एवापवर्गः पुरुषार्थत्वेन ख्यातः, यश्च पुराणेषु परमपुरुषार्थत्वेन गीयते। उक्तपुरुषार्थलक्षणमपि परमपुरुषार्थभूतेऽपवर्गे एव अन्वेति न तु धर्मादिषु त्रिषु। यद्यपि मोक्ष एव पुरुषार्थस्तथापि धर्म–अर्थ–कामानामपि मनुष्यजीवने महत्वपूर्णं स्थानं विद्यते, मोक्षार्थमपि विद्यते तेषामुपयोगित्वमिति तेषामपि पुरुषार्थपदेन उल्लेखो विहित इति विवेकः।
अपवर्गस्य स्वरूपविषये सन्ति दार्शनिकेषु विप्रतिपत्तयः। किन्तु तत्त्वज्ञानम् अपवर्गस्य साधकमित्यत्र मतभेदो न्यून एव। न्यायदर्शनप्रवर्तकेन मुनिना गौतमेन स्वशास्त्रारम्भे तत्त्वज्ञानस्यैव निःश्रेयससाधकत्वं प्रत्ययपादि– प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय – वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। इति। ननु 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुत्या आत्मज्ञानस्यैव मोक्षोपायत्व प्रतिपादनात् कथं महर्षिणा पदार्थतत्त्व–ज्ञानस्य मोक्षोपायत्वर्णनम्? इति चेद् इत्थम्–प्रमाणादिपदार्थज्ञानपूर्वकमेव आत्मत्त्वज्ञानं सम्भवति, मानाधीना मेयसिद्धिरिति नियमात्। न्यायदर्शने आत्मनः प्रमेयपदार्थेषु परिगणना विद्यते, यथा च सूत्रम् – आत्मशरीरेन्द्रियार्थ–बुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखा– पवर्गास्तु प्रमेयम्। इति।

अपवर्गस्य किं स्वरूपम् इति जिज्ञासायां श्रीमतोदयनेन प्रतिपादतम् – 'तदत्यन्तविमोक्षोऽपवर्गः' इति। अर्थात् आत्यन्तिकदुः खध्वंसो मोक्ष इत्यर्थः। साङ्ख्यशास्त्रेऽपि आत्यन्तिकदुः खध्वंससस्य मोक्षत्वं प्रतिपादितम्–

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्।। इति।

ये मनुष्याः स्वजीवनस्य वैशिष्ट्यं विस्मृत्य स्वजीवनं निष्फलं कुर्वन्ति तेषां शास्त्रेषु बहुधा निन्दाऽपि श्रूयते। यथा–

ते मर्त्यलोके भुमिभारभूता मनुष्यरूपेण मृगाश्चरन्ति।
किञ्च–धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।
अजागलस्तनस्येव तस्य जन्म निरर्थकम्। इत्यादि।

तर्हि अतिविशिष्टस्य मनुष्यजीवनस्य परमोद्देश्यं किमिति चेत्, पुरुषार्थ एवेति मन्तव्यम्। यज्ज्ञातं सत् स्ववृत्तितयेष्यते स पुरुषार्थ इति पुरुषार्थलक्षणम्। अर्थात् यद् वस्तु ज्ञातं सत् 'मम सम्बन्धि भवतु' इतीष्यते तदेव पुरुषार्थः। इतरेच्छानधीनेच्छाविषयत्वमित्यत्र तात्पर्यम्। पुराणेतिहासेषु पुरुषार्थचतुष्ट्यं वर्णितं वर्तते। ते च धर्म–अर्थ–काम–मोक्षाः। यथा चोक्तं महाभारते–

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तद्कचित्।। इति।

किन्तु दर्शनशास्त्रेषु पुरुषार्थचतुष्टयस्य चर्चा न श्रूयते। तत्र तु एक एवापवर्गः पुरुषार्थत्वेन ख्यातः, यश्च पुराणेषु परमपुरुषार्थत्वेन गीयते। उक्तपुरुषार्थलक्षणमपि परमपुरुषार्थभूतेऽपवर्गे एव अन्वेति न तु धर्मादिषु त्रिषु। यद्यपि मोक्ष एव पुरुषार्थस्तथापि धर्म–अर्थ–कामानामपि मनुष्यजीवने महत्वपूर्णं स्थानं विद्यते, मोक्षार्थमपि विद्यते तेषामुपयोगित्वमिति तेषामपि पुरुषार्थपदेन उल्लेखो विहित इति विवेकः।
अपवर्गस्य स्वरूपविषये सन्ति दार्शनिकेषु विप्रतिपत्तयः। किन्तु तत्त्वज्ञानम् अपवर्गस्य साधकमित्यत्र मतभेदो न्यून एव। न्यायदर्शनप्रवर्तकेन मुनिना गौतमेन स्वशास्त्रारम्भे तत्त्वज्ञानस्यैव निःश्रेयससाधकत्वं प्रत्ययपादि–

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय–
वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां
तत्त्वज्ञानान्निःश्रेयसाधिगमः। इति।

ननु 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुत्या आत्मज्ञानस्यैव मोक्षोपायत्व प्रतिपादनात् कथं महर्षिणा पदार्थतत्त्व–ज्ञानस्य मोक्षोपायत्वर्णनम्? इति चेद् इत्थम्–प्रमाणादिपदार्थज्ञानपूर्वकमेव आत्मत्वज्ञानं सम्भवति, मानाधीना मेयसिद्धिरिति नियमात्। न्यायदर्शने आत्मनः प्रमेयपदार्थेषु परिगणना विद्यते, यथा च सूत्रम् – आत्मशरीरेन्द्रियार्थ–बुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखा– पवर्गास्तु प्रमेयम्। इति।
अपवर्गस्य किं स्वरूपम् इति जिज्ञासायां श्रीमतोदयनेन प्रतिपादतम् – 'तदत्यन्तविमोक्षोऽपवर्गः' इति। अर्थात् आत्यन्तिकदुः खध्वंसो मोक्ष इत्यर्थः। साङ्ख्यशास्त्रेऽपि आत्यन्तिकदुः खध्वंसस्य मोक्षत्वं प्रतिपादितम्–

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्।। इति।

दुःखध्वंसे आत्यन्तिकत्वञ्च स्वसमानाधिकरणदुःखसमानकालीनत्वम्। स्वं = दुःखध्वंसः, दुःखध्वंससमानाधिकरणं यद् दुःखम्, तदसमानकालीनत्वं चरमदुःखध्वंसे विद्यते। बद्धावस्थायाम् आत्मनि विद्यमाने दुःखध्वंसे दुःखसमानकालीनत्वं विद्यते। चरमदुःखध्वंसे तु दुःखमानकालीनत्वं न सम्भवति, तदनन्तरं दुःखानुपत्तेः। शुकादिदुःखध्वंसरूपमोक्षेऽपि बद्धजीवात्मनि विद्यमानदुःखसमानकालीनत्वस्य विद्यमानत्वेन तत्राव्याप्तिवारणाय दुःखे स्वसमानाधिकरणत्वनिवेशः। तथा च शुकात्मनि विद्यमानो यो दुःखध्वंसः, तत्समानाधिकरणं दुःखम् = शुकात्मन्येव मुक्तिपूर्वं विद्यमानं दुःखम्, तदसमानकालीनत्वस्य शुकात्मनि विद्यमानत्वेन नाव्याप्तिः। वर्तमानकाले अस्मादादिआत्मन्यपि यत्किंचद् दुःखध्वंससत्वेन तत्रापि दुःखध्वंससमानाधिकरणत्वस्य विद्यमानत्वेनास्माकमपि मुक्तत्वापत्तिवारणाय दुःखासमानकालीनत्वमिति। अस्माकमात्मनि विद्यमाने दुःखध्वंसे च दुःखसमानकालीनत्वस्यैव विद्यमानत्वेन न तत्रातिव्याप्तिः।
न्यायशास्त्रे चैकविंशतिः दुःखनि परिगणितानि। शरीरम्, षडिन्द्रियाणि, षड्विषयाः, सुखम्, दुःखश्चेति। एवंविधैकविशतिदुःखानाम् आत्यन्तिकी निवृतिरेव मोक्ष इति व्यपदिश्यते। ननु एतावता आत्यन्तिकदुःखनिवृत्तेः मोक्षत्वं प्रतिपादितम्, तत्त्वज्ञानेन निःश्रेयसमाधिगम इति तु पूर्वं प्रतिपादितम्, कथं तत्त्वज्ञानस्य अपवर्गसाधनत्वम्? इति जिज्ञासायां प्रोक्तं न्यायसूत्रकृता–

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये
तदनन्तरापायादपवर्गः' इति।

तत्त्वज्ञानं हि साक्षाद् दुःखध्वंससरूपापवर्गं प्रति न कारणं किन्तु मिथ्याज्ञाननिवृत्तिद्वारा प्रयोजकमेव। तथा हि तत्त्वज्ञानेन मिथ्याज्ञानस्य निवृत्तिर्जायते। मिथ्याज्ञाननिवृत्तौ च दोषाणां रागद्वेषाणां निवृत्तिर्जायते। दोषनिवृत्तौ च प्रवृत्तैरर्थात् धर्माधर्मयोर्निवृत्तिर्जायते। प्रवृत्यभावे च जन्मनिवृत्तिः, जन्मनिवृत्तौ च दुःखनिवृत्तिरूपोऽपवर्गः।
अत्रेदं ध्यातव्यं यत् दुःखस्य मूलं मिथ्याज्ञानमेव। मिथ्याज्ञानञ्चानेकप्रकारकं यथा च वात्स्यायनभाष्ये प्रदर्शितम्– 'आत्मनि तावत् नास्ति इति, अनात्मनि आत्मा इति, दुःखे सुखमिति, अनित्ये नित्यमिति, अत्राणे त्राणमिति, सभये निर्भयमिति, जुगुप्सितेऽभिमतमिति, प्रवृत्तौ नास्ति कर्म नास्ति कर्मफलमिति, दोषेषु नायं दोषनिमित्तः संसार इति, प्रेत्यभावे नास्ति जन्तुर्जीवो वा सत्त्व आत्मा वा यः प्रेयात् प्रेत्य च भवेदिति, इत्यादि। ममत्वबुद्धिरेव बन्धहेतुस्तदभावश्च कल्याणहेतुरिति प्रतिपादितं महाभारते–

द्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम्।
ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम्।।

एवंविधमिथ्याज्ञानानां बन्धहेतुभूतानां विनाशः तत्त्वज्ञानेनैव भवति। मिथ्याज्ञाननिवृत्तौ चोक्तप्रकारणे दुःखनिवृत्तिह्वपो मोक्षोऽधिगम्यते। एतावतास्माभिः विचारितं यत् मनुष्यजीवनस्य परमोद्देश्यं मोक्षाधिगम एव। मोक्षश्च तत्त्वज्ञानसाध्यः। तत्त्वज्ञानञ्च मिथ्याज्ञानं निवर्तयति। मिथ्याज्ञानमेव दुःखस्य, बन्धनस्य संसारस्य वा मूलकारणमिति। अतः मिथ्याज्ञाननिवृत्तावेवास्माभिर्यतनीयम्। मिथ्याज्ञानमेव अज्ञानशब्देन प्रसिद्धम्। मोक्षप्राप्तिमार्गस्तु अतीवदुर्गमः, श्रमसाध्यः, कालसाध्यश्च विद्यते। उक्तञ्च गीतायां भगवता–

मनुष्याणां सहस्त्रेषु कश्चित–यतति सिद्धये
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।। इति।

यद्यपि अपवर्ग एव मनुष्यजीवनस्य परमोद्देश्यं तथापि सामान्यतः सर्वेषां तत्र प्रवृत्तिः न भवति। कठिनत्वात् ज्ञानाभावाद्वा। अनादिसंस्कारवशात् अस्माकम् इन्द्रियाणि बाह्यविषये एव रमन्ते। अतः अस्मिन्नेव जन्मनि अपवर्गप्राप्तिरूपं लयं प्राप्तुं न शक्यते तत्तु क्रमशः बहुजन्मार्जितपुण्यसाध्यमेवेति विचार्य अस्य जीवनस्यापि लक्ष्यविशेषं निर्धारणीयम्।
अर्थकामयोरुपार्जनन्तु सामान्यतः सर्वैः क्रियते एव। तदर्थमुपदेशविशेषस्यापेक्षापि न भवति। किन्तु धर्मपूर्वकयोरेव

तयोरर्थकामयोः समर्थनं शास्त्रेषु विहितं नान्यस्य। स्वोपयोगाधिकधनकामस्य निन्दापि श्रूयते–

यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम्।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति।। इति। कामस्य विषयेऽपि भगवता प्रोक्तम्–
धर्मविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ। इति।

अतः आद्येषु त्रिषु पुरुषार्थेषु धर्मस्यैव वैशिष्ट्यं विद्यत इति अस्माकं जीवनस्य उद्देश्यरूपेण धर्म एव ग्राह्यः। मोक्षाभिलाषिणा तु धर्मः आचरणीय एव, अर्थकामाभिलाषिणा अपि धर्म एवाचरणीयः। यतो हि पूर्वम् अनुष्ठितो हि धर्मः अर्थकामौ जनयति। धर्म एवं सुखस्य मूलं विद्यते। अत एवोक्तम्–

सुखं तु जगतामेव काम्यं धर्मेण जायते।
अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्।। इति।
धर्ममात्रासाधारणकारणो गुणो सुखम्। इति च।

धर्म एव मनुष्यं पशुभ्यः पृथक्करोति प्रसिद्धमेतत्–

आहारनिद्रा भयमैथुनञ्च
सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो
धर्मेण हीनाः पशुभिः समानाः। इति।

धर्म एक एव परमं मित्रं विद्यते यो मृत्युकालेऽपि न त्यजति–

एक एव सुहृद् धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति।। इति।

धर्मस्यैवंविधं महत्त्वं विज्ञाय सर्वैः मनुष्यैः धर्माचरणपूर्वकमेव स्वजीवनं यापनीयम्। तथा सति जीवने सुखम्, ऐश्वर्यम्, समृद्धयादिकं सर्वं लब्ध्वा क्रमशः अपवर्गोऽपि लब्धुं शक्यते इति।